बालः शिशुभिः । इति दुर्गादासः ॥
क्रीड़ः, पुं, (क्रीड़+भावे घञ् ।) परीहासः । इति शब्दरत्नावली ॥
क्रीड़नं, क्ली, (क्रीड़+भावे ल्युट् ।) खेला । यथा ।
"बालक्रीड़नमिन्दुशेखरधनुर्भङ्गावधि प्रक्रता
ताते काननसेवनावधि क्षमा सुग्रीवसख्यावधि" ।
इति महानाटकम् ॥
क्रीड़ा, स्त्री, (क्रीड़+भावे अप् ततष्टाप् ।) परीहासः । खेला । इत्यमरः । १ । ७ । ३३ ॥
(यथा, भागवते । २ । ३ । १५ ।
"स वै भागवतो राजा पाण्डवेयो महारथः ।
बालक्रीड़नकैः क्रीड़न् कृष्णक्रीड़ां य आददे" ॥)
अवज्ञानम् । इति मेदिनी ॥
क्रीड़ातालः, पुं, (क्रीड़ानामकस्तालः ।) तालप्रभेदः । यथा,—
"एक एव द्रुतो यत्र क्रीड़ातालः स कथ्यते ।
अपरं नियमं विना" । इति सङ्गीतदामोदरः ॥
क्रीड़ारत्नं, क्ली, (क्रीड़ायां क्रीड़ायाः वा रत्नमिव ।) रतिः । इति त्रिकाण्डशेषः ॥ [हलायुधः ॥
क्रीड़ारथः, पुं, (क्रीड़ार्थे रथः ।) क्रीड़ार्थरथः । इति
क्रीतः, पुं, (क्री+कर्म्मणि क्तः ।) क्रीतकपुत्त्रः । स तु द्वादशविधपुत्त्रान्तर्गतपुत्त्रभेदः । इति जटाधरः ॥ (यथाह, याज्ञवल्क्यः ।
"दद्यात् माता पिता वा यं स पुत्त्रो दत्तको भवेत् ।
क्रीतस्तु ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयं कृतः" ॥)
कृतक्रये त्रि । केना इति भाषा । यथा,—
"दीयमानं न गृह्णाति क्रीतं पण्यन्तु यः क्रयी ।
स एवास्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः" ॥
इति प्रायश्चित्ततत्त्वे नारदः ॥
क्रीतकः, पुं, (क्रीत+स्वार्थे कन् ।) क्रीतपुत्त्रः । यथा, मनुः । ९ । १७४ ।
"क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा" ॥
क्रीतानुशयः, पुं, (क्रीते क्रये अनुशयः पश्चात्तापः ।) द्रव्यं क्रीत्वा पश्चादनुतापः । यथा,—
"क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते ।
क्रीतानुशय इत्येतत् विवादपदमुच्यते" ॥
इति याज्ञवल्क्यः ॥
क्रुङ्, [ञ्], पुं स्त्री, (क्रुञ्चति वक्रं यथा स्यात् तथा गच्छति । "ऋत्विग् दधृक् स्रगिति" । ३ । २ । ५९ । इति निपातनात् साधुः ।) क्रौञ्चः । इत्यमरः । २ । ५ । २२ ॥ कोँच् बक इति भाषा । (यथा, यजुर्वेदे १९ । ७३ ।
"अद्भ्यः क्षीरं व्यपिबत् क्रुङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियम्" ।
"आङ्गिरसः अङ्गानां रसः प्राणो यथा, क्रुङ् हंसो भूत्वा धिया प्रज्ञया अद्भ्यः सकाशात् क्षीरं दुग्धं व्यपिबत् पिबति संसृष्टाभ्यां क्षीरोदकाभ्यां क्षीरमेव हंसः पिबतीति जातिस्वभावः" । इति भाष्यम् ॥)
क्रुञ्चः, पुं, (क्रुन्च+अच् ।) क्रौञ्चपर्व्वतः । इति हेमचन्द्रः ॥ (वकविशेषः । यथा, यजुर्वेदे २४ । २२ ।
"वायवे बलाका इन्द्राग्निभ्यां क्रुञ्चान्" ॥)
क्रुञ्चा, स्त्री, (क्रुञ्च+स्त्रियां संयोगोपधत्वात् टाप् ।) अजादित्वात् टाविति केचित् । वीणाभेदः । इति शब्दरत्नावली ॥
क्रुत्, [ध्] स्त्री, (क्रुध्+सम्पदादित्वात् क्विप् भावे ।) क्रोधः । इत्यमरहेमचन्द्रौ ॥ अस्या रूपान्तराणि । क्रुद् । क्रुत्त क्रुद् । इति संक्षिप्तसारव्याकरणम् ॥
क्रुद्धः, त्रि, (क्रुध्+कर्त्तरि क्तः ।) क्रोधयुक्तः । यथा ।
"योद्धुमभ्याययौ क्रुद्धो रक्तवीजो महासुरः" ॥
इति देवीमाहात्म्यम् ॥ (भावे क्तः ।) क्रोधे क्ली ॥
क्रुध, रु य औ कोपे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-अनिट् ।) रु, अक्रुधत् । य, क्रुध्यति लोकः शिशवे । औ, क्रोद्धा । इति दुर्गादासः ॥ * ॥ रेलते १ हेलते २ भामते ३ हृणीयते ४ भीयाति ५ भेषति ६ दोधति ७ वनष्यति ८ कम्पते ९ भोजते १० । इति दश क्रुध्यतिकर्म्माणः । इति वेदनिघण्टौ २ अध्यायः ॥
क्रुधा, स्त्री, (क्रुध्+क्विप् स्त्रियां हलन्तत्वात् वा टाप् ।) क्रोधः । इत्यमरटीकायां भरतः ॥
क्रुन्च, गत्याम् । वक्रत्वे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-अकं च-सेट् ।) रेफयुक्तादिः पञ्चमस्वरी । क्रुञ्चति । इति दुर्गादासः ॥
क्रुश, ग श्लिषि । क्लिशि । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट् ।) पञ्चमस्वरी रेफयुक्तः । क्लिशि दुःखानुभवे । ग, क्रुश्नाति बुभुक्षार्त्तः । इति हलायुधः । क्रुश्य । इति दुर्गादासः ॥
क्रुश, ज औ रोदे । ह्वाने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-रोदने अकं-आह्वाने सकं-अनिट् ।) ज, क्रोशः क्रुशः । औ, अक्रुक्षत् । रोदोऽश्रुविमोचनम् । ह्वतिराह्वानम् । इति दुर्गादासः ॥
क्रुश्वा, [न्] पुं स्त्री, (क्रोशति रौतीति । क्रुश+"क्रोष्टु क्रुशिवहीति" । उणां ४ । ११३ । इति क्वनिप् ।) शृगालः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
क्रुष्टं, क्ली, (क्रुश्+भावे क्तः ।) रोदनम् । इत्यमरः । १ । ७ । ३५ ॥ रावः । इति मेदिनी ॥
क्रूरः, त्रि, (कृत् छेदने+"कृतेश्छ क्रूच" । उणां २ । २१ । इति रक्प्रत्ययः धातोः क्रूादेशश्च ।) परद्रोहकारी । (यथा, मेघदूते । १०७ ।
"क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः" ॥)
निर्दयः । तत्पर्य्यायः । नृशंसः २ घातुकः ३ पापः ४ । (यथा, भागवते । ९ । १४ । ३७ ।
"स्त्रियो ह्यकरुणाः क्रूरा दुर्मर्षाः प्रियसाहसाः" ॥
यथा, च कुमारे । २ । ४८ ।
"तस्मिन्नुपायाः सर्व्वे नः क्रूरे प्रतिहतक्रियाः" ।
"क्रूरे घातुके" इति मल्लिनाथः ॥)
कठिनः । इत्यमरः । ३ । ३ । १९० ॥
(यथा, रघुवंशे । १२ । ४ ।
"तस्याभिषेकसम्भारं कल्पितं क्रूरनिश्चया" ॥)
घोरः । इति मेदिनी ॥ (यथा, पञ्चतन्त्रे ३ । २५ ।
"क्रूरो लुब्धोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः" ॥)
उष्णः । इति हेमचन्द्रः ॥ प्रथमतृतीयपञ्चमसप्तमनवमैकादशराशयः । यथा,—
"ओजोऽथ युग्मं विषमः समश्च
क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः" ॥
इति दीपिका ॥
क्रूरः, पुं, (कृन्ततीति । "कृतेश्छ क्रूच" । उणां २ । २१ । इति रक् धातोः क्रूादेशश्च ।) भूतांकुशवृक्षः । रक्तकरवीरवृक्षः । श्येनपक्षी । कङ्कपक्षी । इति राजनिर्घण्टः ॥
क्रूरकर्म्मा, [न्] पुं, (क्रूरं कर्म्म यस्य ।) भयानककर्म्मकर्त्तरि त्रि ॥ (यथा, पञ्चतन्त्रे । १ । ७० ।
"द्विजिह्वाः क्रूरकर्म्माणो निष्ठाश्छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव" ॥)
कटुतुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ (अर्कपुष्पी । अस्याः पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका" ॥)
क्रूरगन्धः, पुं, (क्रूरः उग्रो गन्धोऽस्य ।) गन्धकः । इति राजनिर्घण्टः ॥
क्रूरगन्धा, स्त्री, (क्रूरः उग्रो गन्ध एकदेशे ऽस्याः । स्त्रियां टाप् ।) कन्थारीवृक्षः । इति राजनिर्घण्टः ॥
क्रूरदृक्, [श्] त्रि, (क्रूरा दृक् दृष्टिर्यस्य । क्रूरं यथा स्यात् तथा पश्यति वा । दृश्+क्विन् ।) पिशुनः । शनैश्चरे पुं । इति मेदिनी ॥ (यथा,—ज्योतिषतत्त्वे । "आरोवक्रः क्रूरदृक् चावनेयः" ॥)
क्रूरधूर्त्तः पुं, (क्रूरः कृष्णवर्णतया धूर्त्त इव ।) कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥ (कृष्णधत्तूरकशब्देऽस्य गुणपर्य्याया ज्ञातव्याः ॥)
क्रूररावी, [न्] पुं, (क्रूरं कर्कशं उग्रं वा रौतीति । रु+णिनिः ।) द्रोणकाकः । इति राजनिर्घण्टः ॥
क्रूरलोचनः, पुं, (क्रूरे लोचने क्रूरं लोचनं वा यस्य ।) शनिः । इति हारावली ॥
क्रूरस्वरः, त्रि, (क्रूरः कर्कशः स्वरोऽस्य ।) कर्कशध्वनियुक्तः । यथा,—
"क्रूरस्वरा काकोलूकखरष्ट्रोष्ट्राश्वगर्दभाः" ॥
इति कविकल्पलतायां द्वितीयस्तबकस्य तृतीयकुसुमम् ॥
क्रूरा, स्त्री, (क्रूर+स्त्रियां जातित्वेऽपि न ङीष् अतः टाप् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
क्रूराकृतिः, पुं, (क्रूरा आकृतिर्यस्य ।) रावणः । इति शब्दमाला ॥ (कठोरमूर्त्तौ, त्रि ॥)
क्रेणिः, पुं, (क्री+निः ।) क्रयणम् । इत्युणादिकोषः ।
क्रेतव्यं, त्रि, (क्री+कर्म्मणि तव्यत् ।) क्रेयवस्तु । यथा,
"क्रेयं क्रेतव्यमात्रके" । इत्यमरः । २ । ९ । ८१ ॥
क्रेता, [ऋ] त्रि, (क्री+तृच् ।) क्रयकर्त्ता । यथा ।
"विक्रेतुर्दर्शनाच्छुद्धिः स्वामी द्रव्यं नृपो दमम् ॥
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य विक्रयी" ॥
इति प्रायश्चित्ततत्त्वे याज्ञवल्क्यः ॥
क्रेयं, त्रि, (क्री+कर्म्मणि यत् ।) क्रेतव्यमात्रकम् । इत्यमरः । २ । ९ । ८१ ॥ किनिवार उपयुक्त द्रव्य इति भाषा ॥